# ॥ लघुन्यासः ॥

|| *Laghunyāsaḥ* ||

ॐ अथात्मानं शिवात्मानं श्रीरुद्ररूपं ध्यायेत् ॥

शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम् ।

गङ्गाधरं दशभुजं सर्वाभरणभूषितम् ॥

om athātmānaṁ śivātmānaṁ śrīrudrarūpaṁ dhyāyet ||
śuddhasphaṭikasaṅkāśaṁ trinetraṁ pañcavaktrakam |
gaṅgādharaṁ daśabhujaṁ sarvābharaṇabhūṣitam ||

नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम् ।

व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम् ॥

nīlagrīvaṁ śaśāṅkāṅkaṁ nāgayajñopavītinam |
vyāghracarmottarīyaṁ ca vareṇyamabhayapradam ||

कमण्डल्वक्षसूत्राणां धारिणं शूलपाणिनम् ।

ज्वलन्तं पिङ्गलजटा-शिखामुद्योतधारिणम् ॥

kamaṇḍalvakṣasūtrāṇāṁ dhāriṇaṁ śūlapāṇinam |
jvalantaṁ piṅgalajaṭā-śikhāmudyotadhāriṇam ||

वृषस्कन्ध-समारूढम् उमादेहार्ध-धारिणम् ।

अमृतेनाप्लुतं शान्तं दिव्यभोग-समन्वितम् ॥

vṛṣaskandha-samārūḍham umādehārdha-dhāriṇam |
amṛtenāplutaṁ śāntaṁ divyabhoga-samanvitam ||

दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् ।

नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥

digdevatāsamāyuktaṁ surāsuranamaskṛtam |
nityaṁ ca śāśvataṁ śuddhaṁ dhruvamakṣaramavyayam ||

सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम् ।
एवं ध्यात्वा द्विजस्सम्यक् ततो यजनमारभेत् ॥
sarvavyāpinamīśānaṁ rudraṁ vai viśvarūpiṇam |
evaṁ dhyātvā dvijassamyak tato yajanamārabhet ||

ॐ प्रजनने ब्रह्मा तिष्ठतु । पादयोर्विष्णुस्तिष्ठतु । हस्तयोर्हरस्तिष्ठतु । बाह्वोरिन्द्रस्तिष्ठतु । जठरे अग्निस्तिष्ठतु । हृदये शिवस्तिष्ठतु । कण्ठे वसवस्तिष्ठन्तु । वक्त्रे सरस्वती तिष्ठतु । नासिकयोर्वायुस्तिष्ठतु । नयनयोश्चन्द्रादित्यौ तिष्ठेताम् । कर्णयोरश्विनौ तिष्ठेताम् । ललाटे रुद्रास्तिष्ठन्तु । मूर्ध्न्यादित्यास्तिष्ठन्तु । शिरसि महादेवस्तिष्ठतु । शिखायां वामदेवस्तिष्ठतु । पृष्ठे पिनाकी तिष्ठतु । पुरतः शूली तिष्ठतु । पार्श्वयोः शिवाशंकरौ तिष्ठेताम् । सर्वतो वायुस्तिष्ठतु । ततो बहिः सर्वतोऽग्निर्ज्वालामाला-परिवृतस्तिष्ठतु । सर्वेष्वङ्गेषु सर्वा देवता यथास्थानं तिष्ठन्तु । मां रक्षन्तु ॥ सर्वान्महाजनान् रक्षन्तु ॥

om prajanane brahmā tiṣṭhatu | pādayorviṣṇustiṣṭhatu| hastayorharastiṣṭhatu | bāhvorindrastiṣṭhatu | jaṭhare agnistiṣṭhatu | hṛdaye śivastiṣṭhatu | kaṇṭhe vasavastiṣṭhantu | vaktre sarasvatī tiṣṭhatu | nāsikayorvāyustiṣṭhatu | nayanayoścandrādityau tiṣṭhetām | karṇayoraśvinau tiṣṭhetām | lalāṭe rudrāstiṣṭhantu | mūrdhnyādityāstiṣṭhantu | śirasi mahādevastiṣṭhatu | śikhāyāṁ vāmadevastiṣṭhatu | pṛṣṭhe pinākī tiṣṭhatu | purataḥ śūlī tiṣṭhatu | pārśvayoḥ śivāśaṅkarau tiṣṭhetām | sarvato vāyustiṣṭhatu | tato bahiḥ sarvato'gnirjvālāmālā-parivṛtastiṣṭhatu | sarveṣvaṅgeṣu sarvā devatā yathāsthānaṁ tiṣṭhantu | māṁ rakṣantu || sarvānmahājanān rakṣantu ||

अग्निर्मे वाचि श्रितः। वाग्धृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। वायुर्मे प्राणे श्रितः। प्राणो हृदये। हृदयं मयि।  अहममृते। अमृतं ब्रह्मणि। सूर्यो मे चक्षुषि श्रितः। चक्षुर्हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। चन्द्रमा मे मनसि श्रितः। मनो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। दिशो मे श्रोत्रे श्रिताः।  श्रोत्रगं् हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। आपो मे रेतसि श्रिताः। रेतो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। पृथिवी मे शरीरे श्रिता। शरीरगं् हृदये।  हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। ओषधिवनस्पतयो मे  लोमसु श्रिताः। लोमानि हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।इन्द्रो मे बले श्रितः। बलगं् हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।।ईशानो मे मन्यौ श्रितः। मन्युर्हृदये।  हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।आत्मा म आत्मनि श्रितः।  आत्मा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।पुनर्म आत्मा पुनरायुरागात्।  पुनः प्राणः पुनराकूतमागात् वैश्वानरो रश्मिभिर्वावृधानः। अन्तस्तिष्ठत्वमृतस्य गोपाः।

agnirme vāci śritaḥ | vāgdhṛdaye | hṛdayaṁ mayi | ahamamṛte amṛtaṁ brahmaṇi | vāyurme prāṇe śritaḥ | prāṇo hṛdaye | hṛdayaṁ mayi |  ahamamṛte | amṛtaṁ brahmaṇi | sūryo me cakṣuṣi śritaḥ | cakṣurhṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | candramā me manasi śritaḥ | mano hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | diśo me śrotre śritāḥ |  śrotragṁ hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | āpo me retasi śritāḥ | reto hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | pṛthivī me śarīre śritā | śarīragṁ hṛdaye|  hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | oṣadhivanaspatayo me  lomasu śritāḥ | lomāni hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | indro me bale śritaḥ | balagṁ hṛdaye | hṛdayaṁ mayi |

ahamamṛte | amṛtaṁ brahmaṇi |parjanyo me mūrdhni śritaḥ | mūrdhā hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | īśāno me manyau śritaḥ | manyurhṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi | ātmā ma ātmani śritaḥ | ātmā hṛdaye | hṛdayaṁ mayi | ahamamṛte | amṛtaṁ brahmaṇi |punarma ātmā punarāyurāgāt | punaḥ prāṇaḥ punarākūtamāgāt vaiśvānaro raśmibhirvāvṛdhānaḥ | antastiṣṭhatvamṛtasya gopāḥ |

अस्य श्रीरुद्राध्यायप्रश्नमहामन्त्रस्य। अघोर ऋषिः। अनुष्तुप्-छन्द्रः। सङ्कर्षणमूर्तिस्वरूपो योऽसावादित्यः परमपुरुषः स एष रुद्रो देवता। नमः शिवायेति बीजम्। शिवतरायेति शक्तिः। महादेवायेति कीलकम्। श्रीज्ञानगणपति-ज्ञानेश्वरी-नर्मदेश्वर- सहित- श्रीमेधादक्षिणामूर्ति-प्रसादसिद्ध्यर्थे श्रीरुद्राध्यायप्रश्न-महामन्त्रजपे विनियोगः॥

asya śrīrudrādhyāyapraśnamahāmantrasya | aghora ṛṣiḥ | anuṣtup-chandraḥ | saṅkarṣaṇamūrtisvarūpo yo'sāvādityaḥ paramapuruṣaḥ sa eṣa rudro devatā | namaḥ śivāyeti bījam | śivatarāyeti śaktiḥ | mahādevāyeti kīlakam | śrījñānagaṇapati-jñāneśvarī-narmadeśvara- sahita-śrīmedhādakṣiṇāmūrti-prasādasiddhyarthe śrīrudrādhyāyapraśna-mahāmantrajape viniyogaḥ ||

ॐ अग्निहोत्रात्मने अङ्गुष्ठाभ्यां नमः। दर्शपूर्णमासात्मने तर्जनीभ्यां नमः। चातुर्मास्यात्मने मध्यमाभ्यां नमः। निरूढपशुबन्धात्मने अनामिकाभ्यां नमः। ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः। सर्वक्रत्वात्मने करतलकरपृष्ठाभ्यां नमः॥ अग्निहोत्रात्मने हृदयाय नमः। दर्शपूर्णमासात्मने शिरसे स्वाहा। चातुर्मास्यात्मने शिखायै वषट्। निरूढपशुबन्धात्मने कवचाय हुं। ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट्। सर्वक्रत्वात्मने अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्बन्धः॥

om agnihotrātmane aṅguṣṭhābhyāṁ namaḥ | darśapūrṇamāsātmane tarjanībhyāṁ namaḥ | cāturmāsyātmane

madhyamābhyāṁ namaḥ | nirūḍhapaśubandhātmane anāmikābhyāṁ namaḥ | jyotiṣṭomātmane kaniṣṭhikābhyāṁ namaḥ | sarvakratvātmane karatalakarapṛṣṭhābhyāṁ namaḥ || agnihotrātmane hṛdayāya namaḥ | darśapūrṇamāsātmane śirase svāhā | cāturmāsyātmane śikhāyai vaṣaṭ | nirūḍhapaśubandhātmane kavacāya huṁ | jyotiṣṭomātmane netratrayāya vauṣaṭ | sarvakratvātmane astrāya phaṭ | bhūrbhuvassuvaroomiti digbandhaḥ ||

## ॥ ध्यानम् ॥

## || dhyānam ||

आपाताळ-नभः स्थलान्त-भुवन-ब्रह्माण्डमाविस्फुरज्-
ज्योतिः स्फाटिकलिङ्गमौळिविलसत्पूर्णेन्दुवान्तामृतैः ।
āpātāḻa-nabhaḥ sthalānta-bhuvana-brahmāṇḍamāvisphuraj-
jyotiḥ sphāṭikaliṅgamauḻivilasatpūrṇenduvāntāmṛtaiḥ |

अस्तोकाप्लुतमेकमीशमनिशं रुद्रानुवाकाञ्जपन्
ध्यायेदीप्सितसिद्धये ध्रुवपदं विप्रोऽभिषिञ्चेच्छिवम् ॥
astokāplutamekamīśamaniśaṁ rudrānuvākāñjapan
dhyāyedīpsitasiddhaye dhruvapadaṁ vipro'bhiṣiñcecchivam ||

ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमाना भुजङ्गैः
कण्ठे कालाः कपर्दाकलित-शशिकलाश्चण्डकोदण्डहस्ताः ।
brahmāṇḍavyāptadehā bhasitahimarucā bhāsamānā bhujaṅgaiḥ
kaṇṭhe kālāḥ kapardākalita-śaśikalāścaṇḍakodaṇḍahastāḥ |

[version usesd by Swami Paramarthananda:

त्र्यक्षा रुद्राक्षमालाः प्रणतभयहराः शाम्भवा मूर्तिभेदाः

रुद्राः श्रीरुद्रसूक्तप्रकटितविभवा नः प्रयच्छन्तु सौख्यम् ॥

tryakṣā rudrākṣamālāḥ praṇatabhayaharāḥ śāmbhavā mūrtibhedāḥ rudrāḥ śrīrudrasūktaprakaṭitavibhavā naḥ prayacchantu saukhyam || Swami Paramarthananda lectures: Dhyana Slokas of Sri Rudram]

[alternate version, probably incorrect:

त्र्यक्षा रुद्राक्षमालाः प्रकटितविभवाः शाम्भवा मूर्तिभेदाः

रुद्राः श्रीरुद्रसूक्तप्रकटितविभवा नः प्रयच्छन्तु सौख्यम् ॥

tryakṣā rudrākṣamālāḥ prakaṭitavibhavāḥ *śāmbhavā* mūrtibhedāḥ rudrāḥ śrīrudrasūktaprakaṭitavibhavā naḥ prayacchantu saukhyam ||]

ॐ गणानां त्वा गणपतिꣳ हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद सादनम्॥ ॐ महागणपतये नमः॥

Om gaṇānāṁ tvā gaṇapatiṁ havāmahe kaviṁ kavīnām upamaśravastamam |jyeṣṭharājaṁ brahmaṇāṁ brahmaṇaspata ā naḥ śṛṇvannūtibhissīda sādanam || om mahāgaṇapataye namaḥ ||

## ॥ शान्तिपाठः ॥

**|| śāntipāṭhaḥ ||**

ॐ शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

Om śaṁ ca me mayaśca me priyaṁ ca me'nukāmaśca me kāmaśca me saumanasaśca me bhadraṁ ca me śreyaśca me vasyaśca me yaśaśca me bhagaśca me draviṇaṁ ca me yantā ca me dhartā ca me kṣemaśca me dhṛtiśca me viśvaṁ ca me mahaśca me saṁvicca me jñātraṁ ca me sūśca me prasūśca me sīraṁ ca me layaśca ma ṛtaṁ ca me'mṛtaṁ ca me'yakṣmaṁ ca me' nāmayacca me jīvātuśca me dīrghāyutvaṁ ca me'namitraṁ ca me'bhayaṁ ca me sugaṁ ca me śayanaṁ ca me sūṣā came sudinaṁ ca me ||

om śāntiḥ śāntiḥ śāntiḥ ||